# संस्कृतवार्ताः

दिनाङ्कः-19.12.2025

प्रातः - 06:55

लोकसभा- जी.राम.जी.

ह्यः लोकसभायां राज्यसभायां च विकसितभारत-वृत्यावसर- प्रत्याभूतिः तथा आजीविका मिशन (ग्रामीण) विकसितभारत- जी. राम. जी. विंशति-पञ्चविंशति इति विधेयकं स्वीकृतम्। सप्तचत्वारिंशदधिक-द्विसहस्र- विकसितभारतेत्यस्य राष्ट्रियदृष्टिकोणेन सह संरेखितस्य ग्रामीणविकासस्य संरचनायाः स्थापनायै विधेयकं प्रयुज्यते। अस्य विधेयकस्य अन्तर्गतं प्रत्येकस्मिन् ग्रामीणपरिवाराय, यस्य वयस्काः सदस्याः अकौशल-शारीरिक-कार्यं कर्तुं स्वेच्छया इच्छन्ति, तेभ्यः प्रत्येकस्मिन् वित्तीयवर्षे पञ्चविंशत्यधिकैकशत-दिवसानां वेतन-वृत्यावसरस्य वैधानिक-प्रत्याभूतिः प्रदीयते।

भारत-शान्तिः

भारतं परिवर्तनाय परमाणु-ऊर्जायाः सुस्थिर-उपयोगाय तथा प्रगत्यै शांति विंशति-पञ्च-विंशति इति विधेयकं राज्यसभया सह स्वीकृतम्। अस्य विधेयकस्य उद्देश्यं देशवासिनां कल्याणाय परमाणु-ऊर्जायाः आयनाइजिंग रेडिएशन इत्यनेन रूपेण विकासः अस्ति। विधेयकस्य विषये चर्चायाः प्रत्युत्तरे परमाणु-ऊर्जा-राज्यमन्त्री डा. जितेन्द्रसिंहः अवदत् यत्,

कर्करोगस्य चिकित्सायां, खाद्यसंरक्षणे, कृषिकार्ये च परमाणु-तन्त्रज्ञानं महत्त्वपूर्णां भूमिकां निर्वहति। सः सभायै आश्वासितवान् यत् सुरक्षाविषयेषु न्यूनता नागमिष्यति इति।

<u>प्रधानमन्त्री-ओमान्</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना ओमान-इथियोपिया-जोर्डन्-देशनां यात्रा: समापिता:। ओमान्-देशस्य तस्य भ्रमणावधौ, उभौ राष्ट्रौ प्रधानमन्त्री नरेन्द्रमोदी तथा ओमान्-देशस्य सुल्तान-हैथम-बिन-तारिक-इत्येतयोः मध्ये समग्र-आर्थिक-सहभागित्व-सन्धौ हस्ताक्षरं कृत्वा द्वैपाक्षिक-आर्थिक-सम्बन्धेषु महत्त्वपूर्णं सोपानं चिह्नितवन्तौ। उभौ पक्षौ समुद्रीयसहयोगं, उच्चशिक्षा, कृषि, प्रियङ्गु-कृष्यादि षट्-सन्धिपत्रेषु हस्ताक्षराणि जातानि तथा च ओमान-चेम्बर्-आफ़्-कामर्स्-एण्ड्-इण्डस्ट्री तथा कान्फ़ेडरेशन्-आफ़्-इण्डियन्-इण्डस्ट्री इत्येतयोः मध्ये अपि संधिपत्रयो: हस्ताक्षरं जातम्। भारत-ओमान-सम्बन्धेषु तस्य असाधारण-योगदानस्य कृते, तस्य दूरदर्शी-नेतृत्वस्य च कृते, श्रीमोदिनम् ओमान्-देशस्य सुल्तान इत्यनेन 'आर्डर् आफ् ओमान' पुरस्कारः प्रदत्ता।

<u>प्रधानमन्त्री-विश्व-स्वास्थ्य-सङ्घटनस्य</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां पारम्परिकऔषधस्य विषये द्वितीय-विश्व-स्वास्थ्य-सङ्घटनस्य वैश्विक-शिखरसम्मेलने समापनसमारोहे भागं ग्रहीष्यति। अस्मिन् अवसरे, प्रधानमन्त्री समागमं सम्बोधयिष्यति तथा च आयुष्-क्षेत्रस्य प्रमुख-डिजिटल्-पोर्टल्-माय-आयुष्-इन्टेग्रेटेड्-सर्विसेस्-पोर्टल् इत्यादीनि अनेकानि ऐतिहासिकानि आयुष्-उपक्रमान् उद्घाटयिष्यति। सः आयुष्-चिह्नस्यापि अनावरणं करिष्यति, यत् आयुष्-उत्पादानां सेवानां च गुणवत्तायाः वैश्विक-मानदण्डरूपेण कल्पितम् अस्ति। कार्यक्रमावधौ, श्रीमोदी योगस्य प्रशिक्षणविषये डब्ल्यू.एच्.ओ. इत्यस्य तान्त्रिक-प्रतिवेदनस्य, तथा "फ्राम रूट्स् टु ग्लोबल् रीच्

11 इयर्स् आफ् ट्रान्सफार्मेशन् इन् आयुष्" इति पुस्तकस्य च विमोचनं करिष्यति। सः अश्वगन्धा-विषये स्मारक- प्रैष्यचिटीकायाः विमोचनं करिष्यति, यत् भारतस्य पारम्परिक-औषधीय-परम्परायाः वैश्विक-अनुदानस्य प्रतीकः अस्ति।

गुजरात-एस्.आई.आर्.

एस्.आई.आर्. अभियानस्य अन्तर्गतं गुजरातराज्यस्य सर्वेषां विधानसभाक्षेत्राणां मतदातृ-सूचेः अद्य प्रकाशनं भविष्यति। मण्डल-निर्वाचन-अधिकारिणः पुनरावलोकनप्रक्रियायां पारदर्शकतां सुनिश्चेतुं मान्यताप्राप्तानां राजनैतिकदलानां प्रतिनिधिनां कृते प्रारूप-सूचीं प्रत्यर्पयन्ति। अद्य सूच्याः प्रकाशनेन, अभियोगानां आक्षेपानां च आवेदनस्य प्रक्रिया अधिकृततया उद्घाटितास्ति, षड्विंशत्यधिक द्विसहस्रतम वर्षस्य जनवरी-मासस्य अष्टादश-दिनांक पर्यन्तं सक्रियः भविष्यति। नागरिकाः अधुना प्रारूपे स्वनामानि परीक्षितुं शक्नुवन्ति, नूतनानां नामाङ्कनानां, संशोधनानां च कृते आवेदनपत्राणि पूरयितुं शक्नुवन्ति।

पुरुष-क्रिकेट्

पुरुष-क्रिकेट्-क्रीडायां भारत-दक्षिण-आफ्रिका-देशयोः मध्ये पञ्चमान्तिमा च विंशति-प्रति-विंशति-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडा अद्य अहमदाबाद्-नगरे भविष्यति। क्रीडायाः आरम्भः सायं सप्तवादने भविष्यति।